कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ पञ्चम काण्डे सप्तमः प्रश्नः॥

हरिः ओम्॥ यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान्भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान्भवत्याग्नेय्या गायत्रिया प्रथमां चितिमभि मृशेत्त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्च्यते वसीयान्भवतीडायै वा एषा विभक्तिः पशव इडा पशुभिरेनं [१] चिनुते यो वै प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्छत्यश्वावभितस्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिणस्तावालभ्येष्टका उप दध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः साक्षादेव प्रजापतये प्रतिप्रोच्याऽग्निं चिनोति नाऽऽर्तिमार्छत्येतद्वा अह्नो रूपं यच्छवेतोऽश्वो रात्रियै कृष्ण एतदह्नो [२] रूपं यदिष्टका रात्रियै पुरीषमिष्टका उपधास्यङ्च्छवेतमश्वमभि मृशेत्पुरीषमुपधास्यन्कृष्णमहोरात्राभ्यामेवैनं चिनुते हिरण्यपात्रं मधोः पूर्णं ददाति मधव्योऽसानीति सौर्या चित्रवत्यावेक्षते चित्रमेव भवति मध्यन्दिनेऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति॥[३]

एनमेतदह्नोऽष्टाचत्वारिग्ंशच्च॥5.7.1॥

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम्। अस्थूरि णो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा सग्ं शिशाधि॥ पशवो वा एते यदिष्टकाश्चित्याञ्चित्यामृषभमुप

दधाति मिथुनमेवाऽस्य तद्यङ्ञे करोति प्रजननाय तस्माद्यूथेयूथ ऋषभः॥ संवथ्सरस्य प्रतिमां यां त्वा रात्र्युपासते। प्रजाग्ं सुवीरां कृत्वा विश्वमायुर्व्यश्नवत्॥ प्राजापत्या- [४] मेतामुप दधातीयं वावैषैकाष्टका यदेवैकाष्टकायामन्नं क्रियते तदेवैतयाव रुन्ध एषा वै प्रजापतेः कामदुघा तयैव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे येन देवा ज्योतिषोर्ध्वा उदायन् येनाऽऽदित्या वसवो येन रुद्राः। येनाऽङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति॥ सुवर्गाय वा एष लोकाय [५] चीयते यदग्निर्येन देवा ज्योतिषोर्ध्वा उदायन्नित्युख्यग्ं समिन्ध इष्टका एवैता उप धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे। शतं यो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति। तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः [६] परि दत्तेह सर्वे॥ ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु। तेषामृतूनाग्ं शतशारदानां निवात एषामभये स्याम॥ इदुवथ्सराय परिवथ्सराय संवथ्सराय कृणुता बृहन्नमः। तेषां वयग्ं सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम॥ भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा। स नो मयोभूः पितो [७] आ विशस्व शं तोकाय तनुवे स्योनः॥ अज्यानीरेता उप दधात्येता वै देवता अपराजितास्ता एव प्र विशति नैव जीयते ब्रह्मवादिनो वदन्ति यदर्धमासा मासा ऋतवः संवथ्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं निरुप्यत इत्येता हि तद्देवता उदजयन् यदृतुभ्यो निर्वपेद्देवताभ्यः समदं दध्यादाग्रयणं निरुप्यैता आहुतीर्जुहोत्यर्धमासानेव मासानृतून्थ्संवथ्सरं प्रीणाति न देवताभ्यः समदं दधाति भद्रान्नः श्रेयः समनैष्ट देवा

इत्याह हुताद्याय यजमानस्याऽपराभावाय॥[८]

प्राजापत्यां लोकाय देवाः पितो दध्यादाग्रयणं पञ्चविग्ं शतिश्च॥5.7.2॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः। यो नः पुरस्ताद्दक्षिणतः पश्चादुत्तरतोऽघायुरभिदासत्येतग्ं सोऽश्मानमृच्छतु॥ देवासुराः संयत्ता आसन्तेऽसुरा दिग्भ्य आऽबाधन्त तान्देवा इष्वा च वज्रेण चाऽपाऽनुदन्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षूप [९] दधाति देवपुरा एवैतास्तनूपानीः पर्यूहतेऽग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरा गतम्॥ ब्रह्मवादिनो वदन्ति यन्न देवतायै जुह्वत्यथ किन्देवत्या वसोर्धारेत्यग्निर्वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धाराऽऽग्नावैष्णव्यर्चा वसोर्धारां जुहोति भागधेयेनैवैनौ समर्धयत्यथो एता [१०] मेवाऽऽहुतिमायतनवतीं करोति यत्काम एनां जुहोति तदेवाऽव रुन्धे रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोराऽन्या शिवाऽन्या यच्छतरुद्रीयं जुहोति यैवाऽस्य घोरा तनूस्तां तेन शमयति यद्वसोर्धारां जुहोति यैवाऽस्य शिवा तनूस्तां तेन प्रीणाति यो वै वसोर्धारायै [११] प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन्ब्रह्मौदनं पचेत्तं ब्राह्मणाश्चत्वारः प्राऽश्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्ब्रैश्वानरः प्रियायामेवैनां तनुवां प्रति ष्ठापयति चतस्रो धेनूर्दद्यात्ताभिरेव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे॥[१२]

उपैतां धारायै षट्चत्वारिग्ंशच्च॥5.7.3॥

चित्तिं जुहोमि मनसा घृतेनेत्याहाऽदाभ्या वै नामैषाऽऽहुतिर्वैश्वकर्मणी नैनं चिक्यानं भ्रातृव्यो दभ्नोत्यथो देवता एवाऽव रुन्धेऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्याऽऽहुत्या यङ्ञमुखमा रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाऽव रुन्धेऽग्निर्देवेभ्योऽपाक्रामद्भागधेय- [१३] मिच्छमानस्तस्मा एतद्भागधेयं प्राऽयच्छन्नेतद्वा अग्नेरग्निहोत्रमेतर्हि खलु वा एष जातो यर्हि सर्वश्चितो जातायैवाऽस्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान्भवति ब्रह्मवादिनो वदन्ति यदेष गार्हपत्यश्चीयतेऽथ क्वाऽस्याऽऽहवनीय इत्यिसावादित्य इति ब्रूयादेतस्मिन्हि सर्वाभ्यो देवताभ्यो जुह्वति [१४] य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोत्यग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहाऽऽ वह। अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु॥ भद्रं पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः। ततः क्षत्रं बलमोजश्च जातन्तदस्मै देवा अभि सं नमन्तु॥ धाता विधाता परमो- [१५] त संदृक्प्रजापतिः परमेष्ठी विराजा। स्तोमाश्छन्दाग्ंसि निविदो म आहुरेतस्मै राष्ट्रमभि सं नमाम॥ अभ्यावर्तध्वमुप मेत साकमयग्ं शास्ताऽधिपतिर्वो अस्तु। अस्य विङ्ज्ञानमनु सग्ं रभध्वमिमं पश्चादनु जीवाथ सर्वे॥ राष्ट्रभृत एता उपदधात्येषा वा अग्नेश्चिती राष्ट्रभृत्तयैवाऽस्मिन्नाष्ट्रं दधाति राष्ट्रमेव भवति नाऽस्मादाष्ट्रं भ्रग्ंशते॥[१६]

भागधेयं जुह्वति परमा राष्ट्रं दधाति सप्त च॥5.7.4॥

यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याऽग्निरुख्य उद्वायति यन्निर्मन्थ्यं कुर्याद्वि छिन्द्याद्भ्रातृव्यमस्मै जनयेथ्स एव पुनः परीध्यः स्वादेवैनं योनेर्जनयति

नाऽस्मै भ्रातृव्यं जनयति तमो वा एतं गृह्णाति यस्याऽग्निरुख्य उद्वायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसै- [१७] व तमो मृत्युमप हते हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव तमोऽप हतेऽथो तेजो वै हिरण्यं तेज एवाऽऽत्मन्धत्ते सुवर्न घर्मः स्वाहा सुवर्नाऽर्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा सुवर्न सूर्यः स्वाहार्को वा एष यदग्निरसावादित्यो [१८] ऽश्वमेधो यदेता आहुतीर्जुहोत्यर्काश्वमेधयोरेव ज्योतीग्ंषि सं दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत आपो वा इदमग्रे सलिलमासीथ्स एतां प्रजापतिः प्रथमां चितिमपश्यत्तामुपाऽधत्त तदियमभवत्तं विश्वकर्माऽब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्य- [१९] ब्रवीथ्स एतां द्वितीयां चितिमपश्यत्तामुपाऽधत्त तदन्तरिक्षमभवथ्स यङ्ञः प्रजापतिमब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणमब्रवीदुप त्वाऽयानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत्तं दिश्याभिरुपैत्ता उपाऽधत्त ता दिशो- [२०] ऽभवन्थ्स परमेष्ठी प्रजापतिमब्रवीदुप त्वाऽयानीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणं च यङ्ञं चाब्रवीदुप वामाऽयानीति नेह लोकोऽस्तीत्यब्रूताग्ं स एतां तृतीयां चितिमपश्यत्तामुपाऽधत्त तदसावभवथ्स आदित्यः प्रजापतिमब्रवीदुप त्वा- [२१] ऽऽयानीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणं च यङ्ञं चाब्रवीदुप वामायानीति नेह लोकोऽस्तीत्यब्रूताग्ं स परमेष्ठिनमब्रवीदुप त्वाऽऽयानीति केन मोपैष्यसीति लोकं पृणयेत्यब्रवीत्तं लोकं पृणयोपैत्तस्मादयातयाम्नी लोकं पृणाऽयातयामा ह्यसा- [२२] वादित्यस्तानृषयोऽब्रुवन्नुप व आऽयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन्तान्द्वाभ्यां चितीभ्यामुपायन्थ्स पञ्चचितीकः समपद्यत य एवं विद्वानग्निं

चिनुते भूयानेव भवत्यभीमाँल्लोकाञ्जयति विदुरेनं देवा अथो एतासामेव देवतानाग्ं सायुज्यं गच्छति॥[२३]

तमसाऽऽदित्योऽस्तीति दिश आदित्यः प्रजापतिमब्रवीदुप त्वाऽसौ पञ्चचत्वारिग्ंशच्च॥5.7.5॥

वयो वा अग्निर्यदग्निचित्पक्षिणोऽश्नीयात्तमेवाग्निमद्यादार्तिमार्छेत्संवत्सरंव्रतं चरेत्संवत्सरग्ं हि व्रतं नाति पशुर्वा एष यदग्निर्हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात्प्रत्यञ्चमुपचरति तस्मात्पश्चात्प्रा ङुपचर्य आत्मनोऽहिग्ंसायै तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ [२४] पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छाऽन्तरिक्षं यच्छाऽन्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याहैताभिर्वा इमे लोका विधृता यदेता उपदधात्येषां लोकानां विधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उप दधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यं यथ्स्वयमातृण्णा उपधाय [२५] हिरण्येष्टका उपदधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवाऽस्मा इमे लोकाः प्र भान्ति यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः। ताभिः सर्वाभी रुचे जनाय नस्कृधि॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते॥ रुचं नो धेहि [२६] ब्राह्मणेषु रुचग्ं राजसु नस्कृधि। रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम्॥ द्वेधा वा अग्निं चिक्यानस्य यश इन्द्रियं गच्छत्यग्निं वा चितमीजानं वा यदेता आहुतीर्जुहोत्यात्मन्नेव यश इन्द्रियं धत्त ईश्वरो वा एष आर्तिमार्तोर्योऽग्निं चिन्वन्नधिक्रामति तत्त्वा यामि ब्रह्मणा वन्दमान इति वारुण्यर्चा [२७] जुहुयाच्छान्तिरेवैषाऽग्नेर्गुप्तिरात्मनो हविष्कृतो वा एष

योऽग्निं चिनुते यथा वै हविः स्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति मैत्रावरुण्याऽऽमिक्षया यजेत मैत्रावरुणतामेवोपैत्यात्मनोऽस्कन्दाय यो वा अग्निमृतुस्थां वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति संवथ्सरो वा अग्निर् [२८] ऋतुस्थास्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छगं् शरदुत्तरः पक्षो हेमन्तो मध्यं पूर्वपक्षाश्चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका एष वा अग्निर्ऋतुस्था य एवं वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति प्रजापतिर्वा एतं ज्यैष्ठ्यकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छद्य एवं विद्वानग्निं चिनुते ज्यैष्ठ्यमेव गच्छति॥[२९]

पृथिवीं यच्छ यथ्स्वयमातृण्णा उपधाय धेह्यृचाऽग्निश्चिनुते त्रीणि च||**5.7.6**||

यदाकूताथ्समसुस्त्रोद्भूदो वा मनसो वा सं भृतं चक्षुषो वा। तमनु प्रेहि सुकृतस्य लोकं यत्रर्षयः प्रथमजा ये पुराणाः॥ एतगं् सधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः। अन्वागन्ता यड्ञपतिर्वो अत्र तग्ग् स्म जानीत परमे व्योमन्॥ जानीतादेनं परमे व्योमन्देवाः सधस्था विद रूपमस्य। यदागच्छात् [३०] पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै॥ सं प्र च्यवध्वमनु सं प्र याताऽग्ने पथो देवयानान्कृणुध्वम्।अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत॥ प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यड्ञं नो वह सुवर्देवेषु गन्तवे॥ यदिष्टम्यत्परादानं यद्दत्तं या च दक्षिणा। त- [३१] दग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत्॥ येना सहस्रं वहसि येनाऽग्ने सर्ववेदसम्। तेनेमं यड्ञं नो वह सुवर्देवेषु गन्तवे॥ येनाऽग्ने दक्षिणा युक्ता यड्ञं वहन्त्यृत्विजः। तेनेमं यड्ञं नो वह

सुवर्देवेषु गन्तवे॥ येनाऽग्ने सुकृतः पथा मधोर्धारा व्यानशुः। तेनेमं यङ्ञं नो वह सुवर्देवेषु गन्तवे॥ यत्र धारा अनपेता मधोर्घृतस्य च याः। तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत्॥[३२]

आगच्छात्तद्व्यानशुस्तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे चतुर्दश च॥5.7.7॥

यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः। ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्न्॥ उथ्सन्नयङ्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वा अध्वर्युरग्नेश्चिन्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि [३३] धामेत्याहैषा वा अग्नेः स्वयञ्चितिरग्निरेव तदग्निञ्चिनोति नाऽध्वर्युरात्मनोऽन्तरेति चतस्र आशाः प्र चरन्त्वग्नय इमं नो यङ्ञं नयतु प्रजानन्न्। घृतं पिन्वन्नजरग्ं सुवीरं ब्रह्म समिद्भवत्याहुतीनाम्॥ सुवर्गाय वा एष लोकायोप धीयते यत्कूर्मश्चतस्र आशाः प्र चरन्त्वग्नय इत्याह [३४] दिश एवैतेन प्र जानातीमं नो यङ्ञं नयतु प्रजानन्नित्याह सुवर्गस्य लोकस्याऽभिनीत्यै ब्रह्म समिद्भवत्याहुतीनामित्याह ब्रह्मणा वै देवाः सुवर्गं लोकमायन् यद्ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्यजमानः सुवर्गं लोकमेति प्रजापतिर्वा एष यदग्निस्तस्य प्रजाः पशवश्छन्दाग्ंसि रूपग्ं सर्वान् वर्णानिष्टकानां कुर्यादूपेणैव प्रजां पशून्छन्दाग्स्यव रुन्धेऽथो प्रजाभ्य एवैनं पशुभ्यश्छन्दोभ्योऽवरुद्ध्य चिनुते॥[३५]

यान्यग्नय इत्याहेष्टकानाग्ं षोडश च॥5.7.8॥

मयि गृह्णाम्यग्रे अग्निग्ं रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। मयि प्रजां मयि वर्चो

दधाम्यरिष्टाः स्याम तनुवा सुवीराः॥ यो नो अग्निः पितरो हृथ्स्वन्तरमर्त्यो मर्त्यागं् आविवेश। तमात्मन्परि गृह्णीमहे वयं मा सो अस्मागं् अवहाय परा गात्॥ यदध्वर्युरात्मन्नग्निमगृहीत्वाऽग्निं चिनुयाद्योऽस्य स्वोऽग्निस्तमपि [३६] यजमानाय चिनुयादग्निं खलु वै पशवोऽनूप तिष्ठन्तेऽपक्रामुका अस्मात्पशवः स्युर्मयि गृह्णाम्यग्रे अग्निमित्याहाऽऽत्मन्नेव स्वमग्निं दाधार नाऽस्मात्पशवोऽप क्रामन्ति ब्रह्मवादिनो वदन्ति यन्मृच्चाऽऽपश्चाऽग्नेरनाद्यमथ कस्मान्मृदा चाऽद्भिश्चाऽग्निश्चीयत इति यदद्भिः संयौ– [३७] त्यापो वै सर्वा देवता देवताभिरेवैनगं् सगं् सृजति यन्मृदा चिनोतीयं वा अग्निर्वैश्वानरोऽग्निनैव तदग्निं चिनोति ब्रह्मवादिनो वदन्ति यन्मृदा चाऽद्भिश्चाऽग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दागं्सि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो य– [३८] न्मृदा चिनोति तस्मादग्निरुच्यते हिरण्येष्टका उप दधाति ज्योतिर्वै हिरण्यं ज्योतिरेवाऽस्मिन्दधात्यथो तेजो वै हिरण्यं तेज एवाऽऽत्मन्धत्ते यो वा अग्निगं् सर्वतोमुखं चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयति गायत्रीं पुरस्तादुप दधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्य एष वा अग्निः सर्वतोमुखस्तं य एवं विद्वाग्श्चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयत्यथो दिश्येव दिशं प्र वयति तस्माद्दिशि दिक्प्रोता॥[३९]

अपि सयँौति वैश्वानरो यदेष वै पञ्चविगंशतिश्च॥5.7.9॥

प्रजापतिरग्निमसृजत सोऽस्माथ्सृष्टः प्राङ्प्राऽद्रवत्तस्मा अश्वं प्रत्यास्यथ्स दक्षिणाऽऽवर्तत तस्मै वृष्णिं प्रत्यास्यथ्स प्रत्यङ्ङावर्तत तस्मा ऋषभं प्रत्यास्यथ्स

उदङ्ङावर्तत तस्मै बस्तं प्रत्यास्यथ्स ऊर्ध्वोऽद्रवत्तस्मै पुरुषं प्रत्यास्यद्यत्पशुशीर्षाण्युपदधाति सर्वत एवैन- [४०] मवरुध्य चिनुत एता वै प्राणभृतश्चक्षुष्मतीरिष्टका यत्पशुशीर्षाणि यत्पशुशीर्षाण्युपदधाति ताभिरेव यजमानोऽमुष्मिँल्लोके प्राणित्यथो ताभिरेवाऽस्मा इमे लोकाः प्र भान्ति मृदाऽभिलिप्योप दधाति मेध्यत्वाय पशुर्वा एष यदग्निरन्नं पशव एष खलु वा अग्निर्यत्पशुशीर्षाणि यं कामयेत कनीयोऽस्यान्नग्ग् [४१] स्यादिति संतरां तस्य पशुशीर्षाण्युप दध्यात्कनीय एवाऽस्याऽन्नं भवति यं कामयेत समावदऽस्यान्नऽग्ग् स्यादिति मध्यतस्तस्योप दध्याथ्समावदेवाऽस्याऽन्नं भवति यं कामयेत भूयोऽस्याऽन्नग्ग् स्यादित्यन्तेषु तस्य व्युदूह्योप दध्यादन्तत एवास्मा अन्नमव रुन्धे भूयोऽस्याऽन्नं भवति॥[४२]

एवमस्याऽन्नं भूयोऽस्याऽन्नं भवति||5.7.10||

स्तेगान्दग्ग्ष्ट्राभ्यां मण्डूकाञ्जम्भ्येभिरादकां खादेनोर्जग्ग् सग्ंसूदेनाऽरण्यं जां बीलेन मृदं बर्स्वेभिः शर्कराभिरवकामवकाभिः शर्करामुथ्सादेन जिह्वामवक्रन्देन तालुग्ं सरस्वतीं जिह्वाग्रेण॥[४३]

स्तेगान्द्वाविग्ंशतिः||5.7.11||

वाजग्ं हनूभ्यामप आस्येनाऽऽदित्यां छमश्रुभिरुपयाममधरेणोष्ठेन सदुत्तरेणाऽन्तरेणाऽनूकाशं प्रकाशेन बाह्यग्ग् स्तनयित्नुं निर्बाधेन सूर्याग्नी चक्षुभ्यां विद्युतौ कनानकाभ्यामशनिं मस्तिष्केण बलं मज्जभिः॥[४४]

वाजं पञ्चविग्ंशतिः॥5.7.12॥

कूर्माञ्छफैरच्छलाभिः कपिञ्जलान्थ्साम कुष्ठिकाभिर्जवं जङ्घाभिरगदं जानुभ्यां वीर्यं कुहाभ्यां भयं प्रचालाभ्यां गुहोपपक्षाभ्यामश्विनावग्ंसाभ्यामदितिग्ं शीर्ष्णा निर्ऋतिं निर्जाल्मकेन शीर्ष्णा॥[४५]

कूर्मान्त्रयोविग्ंशतिः॥5.7.13॥

योत्रङ्गृध्राभिर्युगमानतेन चित्तं मन्याभिः संक्रोशान्प्राणैः प्रकाशेन त्वचं पराकाशेनाऽन्तरां मशकान्केशैरिन्द्रग्ग् स्वपसा वहेन बृहस्पतिग्ं शकुनिसादेन रथमुष्णिहाभिः॥[४६]

योक्त्रमेकविग्ंशतिः॥5.7.14॥

मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी शिखण्डाभ्यामिन्द्राबृहस्पती ऊरुभ्यामिन्द्राविष्णू अष्ठीवद्भ्याग्ं सवितारं पुच्छेन गन्धर्वाङ्छेपेनाऽप्सरसो मुष्काभ्यां पवमानं पायुना पवित्रं पोत्राभ्यामाक्रमणग्ग् स्थूराभ्यां प्रतिक्रमणं कुष्ठ आभ्याम्॥[४७]॥5.7.15॥

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवो जीमूतान्हृदयौपशाभ्यामन्तरिक्षं पुरितता नभ उदर्येणेन्द्राणीं प्लीहा वल्मीकान्क्लोम्ना गिरीन्प्लाशिभिः समुद्रमुदरेण वैश्वानरं भस्मना॥[४८]

मित्रावरुणाविन्द्रस्य द्वाविग्ंशतिर्द्वाविग्ंशतिः॥5.7.16॥

पूष्णो वनिष्ठुरन्धाहेस्स्थूरगुदा सर्पान्गुदाभिर्ऋतून्पृष्टीभिर्दिवं पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणां द्वितीयाऽऽदित्यानां तृतीयाऽङ्गिरसां चतुर्थी साध्यानां पञ्चमी विश्वेषां देवानाग्ं षष्ठी॥[४९]

पूष्णश्चतुर्विग्ंशतिः॥5.7.17॥

ओजो ग्रीवाभिर्निर्ऋतिमस्थभिरिन्द्रग्ग् स्वपसा वहेन रुद्रस्य विचलः स्कन्धोऽहोरात्रयोर्द्वितीयोऽर्धमासानां तृतीयो मासां चतुर्थ ऋतूनां पञ्चमः संवथ्सरस्य षष्ठः॥[५०]

ओजोविग्ंशतिः॥5.7.18॥

आनन्दं नन्दथुना कामं प्रत्यासाभ्यां भयग्ं शितीमभ्यां प्रशिषं प्रशासाभ्याग्ं सूर्याचन्द्रमसौ वृक्याभ्याग् श्यामशबलौ मतस्नाभ्यां व्युष्टिग्ं रूपेण निम्रुक्तिमरूपेण॥[५१]

आनन्दग्ं षोडश॥5.7.19॥

अहर्मागं्सेन रात्रिं पीवसापो यूषेण घृतग्ं रसेन श्यां वसया दूषीकाभिर्ह्रादुनिमश्रुभिः पृष्वां दिवग्ं रूपेण नक्षत्राणि प्रतिरूपेण पृथिवीं चर्मणा छवीञ्छव्योपाकृताय स्वाहाऽलब्धाय स्वाहा हुताय स्वाहा॥[५२]

अहरष्टाविग्ंशतिः॥5.7.20॥

अग्नेः पक्षतिः सरस्वत्यै निपक्षतिः सोमस्य तृतीयाऽपां चतुर्थ्योषधीनां पञ्चमी संवथ्सरस्य षष्ठी मरुताग्ं सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटूरः॥ [५३]

अग्नेरेकान्न त्रिग्ंशत्॥5.7.21॥

वायोः पक्षतिः सरस्वतो निपक्षतिश्चन्द्रमसस्तृतीया नक्षत्राणां चतुर्थी सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पाणाग्ं सप्तम्यर्यम्णोऽष्टमी त्वष्टुर्नवमी धातुर्दशमीन्द्राण्या एकादश्यदित्यै द्वादशी द्यावापृथिव्योः पार्श्वं यम्यै पाटूरः॥[५४]

वायोरष्टाविग्ंशतिः॥5.7.22॥

पन्थामनूवृग्भ्याग्ं संततिग्ग् स्नावन्याभ्याग्ं शुकान्पित्तेन हरिमाणं यक्ना हलीक्ष्णान्पापवातेन कूश्माङ्छकभिः शवर्तानूवध्येन शुनो विशसनेन सर्पाँल्लोहितगन्धेन वयाग्ंसि पक्वगन्धेन पिपीलिकाः प्रशादेन॥[५५]

पन्थां द्वाविग्ंशतिः॥5.7.23॥

क्रमैरत्यक्रमीद्वाजी विश्वैर्देवैर्यङ्ञियैः संविदानः। स नो नय सुकृतस्य लोकं तस्य ते वयग्ग् स्वधया मदेम॥[५६]

क्रमैरष्टादश॥5.7.24॥

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षग्ं समुद्रो योनिः सूर्यस्ते चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं मासाश्चाऽर्धमासाश्च पर्वाण्यृतवोऽङ्गानि संवथ्सरो महिमा॥[५७]

द्यौः पञ्चविग्ंशतिः॥5.7.25॥

अग्निः पशुरासीत्तेनाऽयजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथाऽव जिघ्र वायुः पशुरासीत्तेनाऽयजन्त स एतं लोकमजयद्यस्मिन्वायुः स ते लोकस्तस्मात्त्वाऽन्तरेष्यामि यदि नाऽवजिघ्रस्यादित्यः पशुरासीत्तेनाऽयजन्त स एतं लोकमजयद्यस्मिन्नादित्यः स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि॥[५८]

यस्मिन्नष्टौच॥5.7.26॥

यो वा अयथा देवतं त्वामग्न इन्द्रस्य चित्तिं यथावै वयो वै यदाकूताद्यास्ते अग्ने मयि गृह्णामि प्रजापतिः सोऽस्माथ्स्तेगान् वाजं कूर्मान् योक्त्रं मित्रावरुणाविन्द्रस्य पूष्णा ओज आनन्दमहरग्ने वर्यो: पन्थां क्रमैर्दयौस्तेऽग्निः पशुरासीथ्षड्विग्ंशतिः॥26॥

यो वा एवाहुतिमभवन्यथिभिरवरुद्ध्यानन्दमष्टौपञ्चाशत्॥५८॥

यो वा अयथा देवतं यद्यव जिघ्रसि॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति पञ्चम काण्डे सप्तमः प्रश्नः॥

॥पञ्चम काण्डः समाप्तः॥